**SET – 4**

**Series : SSO/1**

**कोड नं.**
**Code No. 49/1**

**रोल नं.**
**Roll No.** | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **13** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **13** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*अवधि : होरात्रयम् ]* *[ पूर्णाङ्का : **100***
*निर्धारित समय : **3** घंटे ]* *[ अधिकतम अंक : **100***
*Time allowed : **3** hours ]* *[ Maximum marks : **100***

**निर्देशा :**
**निर्देश :**
**Instructions :**

संकेताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि ।

जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।

*Answer all questions in Sanskrit unless instructions are given otherwise.*

अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।
इस प्रश्नपत्र में **चार** खण्ड हैं ।
*There are **four** sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांश - अवबोधनम् (अपठितांश - अवबोधन ) | **15 अङ्काः** |
| Section A | : | Unseen Reading Comprehension | |
| खण्डः ख | : | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | **15 अङ्काः** |
| Section B | : | Writing Skills in Sanskrit | |
| खण्डः ग | : | पठितांश - अवबोधनम् संस्कृतसाहित्यस्य परिचयः च (पठितांश-अवबोधन एवं संस्कृत साहित्य परिचय) | **40 + 10 = 50 अङ्काः** |
| Section C | : | Reading Comprehension & Introduction to History of Sanskrit Literature | |
| खण्डः घ | : | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | **20 अङ्काः** |
| Section D | : | Metres and Figures of Speech | |

## खण्डः क (Section A) **15 अङ्काः**

### अपठितांश – अवबोधनम्

### अपठितांश – अवबोधन

### Unseen Reading Comprehension

1. अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए :

Read the following **two** passages and answer the given questions in Sanskrit :

**(क) प्रथमः अनुच्छेदः**

स्वपन् जनः कथं जपं ध्यानं वा कर्तुं शक्नोति । निद्रा जपं च युगपद् न भवतः । निद्रायां मनोवृत्तिः लीना भवति सा च तदेव भवति यद् निद्रायाः पूर्वं च सततम् अचिन्तयत् । अतः जपन् ध्यायन् वा नरः सुप्यात्, एवं पुरुषो यदा उत्थास्यति तदा तदेव पुनः चिन्तयिष्यति यत्सोऽनिद्रितः जपम् अकरोत् यतो वृत्तिर्यत्र लीना भवति तस्मिन् एव सा उदेति । एवं निद्रायाः पूर्वं पश्चाद् वा मनो जपे ध्याने वा प्रलीनं भवेत् ।

**प्रश्नाः**

(अ) एकपदेनोत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) स्वपन् कः भवति ?

(ii) मनोवृत्तिः निद्रायां कीदृशी भवति ?

(ब) पूर्णवाक्येनोत्तरत । **$2 \times 1 = 2$**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

पुरुष उत्थाय किं चिन्तयिष्यति ?

(स) यथानिर्देशम् उत्तरत । **$\frac{1}{2} \times 4 = 2$**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'उत्थास्यति' अस्य कर्तृपदं किम् ?

(ii) 'जागृत:' अस्य क: पर्याय: ?

(iii) 'यस्मिन्' अस्य विलोमपदं किम् ?

(iv) 'जन:' अस्य विशेषणं किम् ?

**(ख) द्वितीय: अनुच्छेद:**

यो जनो यत्र नियुक्त:स्यात् स स्वनियतधर्मस्य स्वनियतकर्मणो वा पालनं निश्छल: अप्रमाद: सन् वा कुर्यात् । यदि कश्चित् शासनकर्मसु नियुज्यते तर्हि स स्वराजधर्मम् अवश्यं पालयतु । कश्चित् शिक्षक: चिकित्सालये चिकित्सक:, कार्यालये अध्यक्ष:, उद्योगस्य अध्यक्ष:, विपणिकारो वा भवितुं शक्नोति, स तत्रैव स्वकर्म, कार्यभारं सत्परिश्रमेण निष्ठया वा परिपूर्णं करोतु । भगवान् श्रीकृष्ण: गीतायां यज्ञार्थात् कर्मण: इत्युक्तवान् । अत्र यज्ञशब्द: सार्थको गभीरश्च । भगवतो मतेन तु इदमेव कथयितुं शक्यते यत् नि:स्वार्थभावेन श्रेष्ठस्य कर्मण: पालनमेव यज्ञकर्म भवति । अनेनैव रूपेण परमेश्वरस्य पूजनं कुर्वन् मानव: सर्वत्र संसिद्धिं प्राप्नोति ।

**प्रश्ना:**

(अ) एकपदेनोत्तरत । **$1 \times 2 = 2$**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) जन: कथं कर्मण: पालनं कुर्यात् ?

(ii) मानव: सर्वत्र कां प्राप्नोति ?

(ब) पूर्णवाक्येनोत्तरत । **$2 \times 1 = 2$**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

शासनकर्मणि नियुक्त: किं करोतु ?

(स) यथानिर्देशम् उत्तरत । **1 × 4 = 4**

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'प्राप्नोति' अस्या: क्रियाया: कर्तृपदं किम् ?

(ii) 'अर्चनम्' अस्य क: पर्याय: अत्र प्रयुक्त: ?

(iii) 'नि:स्वार्थ:' अस्य विलोमपदं किम् ?

(iv) "स स्वराजधर्मं पालयतु" अत्र 'स' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं **संस्कृतेन** लिखत । **2**

इस अनुच्छेद के लिए उपयुक्त शीर्षक **संस्कृत** में लिखिए ।

Write a suitable title for this passage in **Sanskrit**.

## खण्ड: ख (Section B) — 15 अङ्का:

## संस्कृतेन रचनात्मकलेखनम्

## संस्कृत में रचनात्मक लेखन

## Writing Skills in Sanskrit

2. मञ्जूषात: उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुन: लिखत : **1 × 10 = 10**

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूर्णकर लिखिए :

Complete and rewrite the following story, with the help of the words given in the box below :

**कथा :**

रानीखेतस्य पार्श्वे जेम्समहोदयस्य ______ (i) अस्ति । अत्रत्येषु ______ (ii) 'गन्धक' इति नामा पदार्थ: विद्यते । तस्य कदुष्णेन जलेन सर्वे ______ (iii) नष्टा भवन्ति । अनेनैव कारणेन सोऽत्र निवसति । अहमपि वर्षपर्यन्तमत्र ______ (iv) । श्रीमान् भवने ______ (v) एव वसति । अविवाहितोऽस्ति स: । एक: मालाकार:, एक: पाचक: एकश्च टामीनामक: श्वाऽपि निवसति । एकदा अहं तेन सह मिलित:, सहर्षं च सोऽपि मां प्रति सख्यभावेन ______ (vi) । आवां बहुकालं यावत् हिन्दीसाहित्ये ______ (vii) च परिचर्चां कुर्व: । शुद्धां हिन्दीभाषां ______ (viii) स: । तस्य गभीराध्ययनं ज्ञात्वा ______ (ix) जायेऽहम् । स वैष्णवधर्मे ______ (x) सन् आगरानगरम् आगत्य प्रवक्तु: पदे कार्यं कृतवान् ।

**मञ्जूषा**

| |
|---|
| 1. चकितो 2. निर्झरेषु 3. आसक्त: 4. भवनम् 5. वैष्णवे 6. वदति 7. निवसामि 8. उदररोगा: 9. एकाकी 10. अदर्शयत् । |

3. मञ्जूषात: पदानि चित्वा प्रधानमन्त्रिण: “स्वच्छताभियानम्” इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत । **$1 \times 5 = 5$**

मञ्जूषा से पदों को चुनकर प्रधानमन्त्री के “स्वच्छताभियान” विषय पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit on Prime Ministers “Clean Drive” with the help of the words given in the box below.

**मञ्जूषा**

| |
|---|
| 1. महात्मगान्धिन: जन्मदिवसे, 2. अघोषयत् 3. नव नव, 4. मनोनीतान्, 5. स्वच्छतया, 6. नश्यन्ति, 7. रोगा:, 8. सर्वत्र, 9. राजनीतौ, 10. दैनिके जीवने, 11. गृहे 12. देशे, 13. कार्येषु, 14. तत्परता, 15. स्वच्छम्, 16. मन:, 17. कार्येषु, 18. व्यग्रता, 19. सिद्धिम् । |

## खण्ड : ग (Section C) **40 + 10 = 50 अङ्का:**

### पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचय: च

### पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय

### Reading Comprehension & Introduction to History of Sanskrit Literature

4. अधोलिखितं पद्यं, गद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित पद्य, गद्यांश तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following poetry, prose and drama passages and answer the given questions in Sanskrit :

**(क) पद्यम्**

“यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुष: ।
आत्मश्रेयसि तावदेव विदुषा कार्य: प्रयत्नो महान्,
प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यम: कीदृश: ।।”

**प्रश्ना:**

(अ) एकपदेनोत्तरत । **$\frac{1}{2} \times 2 = 1$**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) जरा कुत्र अस्ति ?

(ii) कीदृश: प्रयत्न: कार्य: ?

(ब) पूर्णवाक्येनोत्तरत । $2 \times 1 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

प्रदीप्ते भवने किं न युक्तम् ?

(स) यथानिर्देशमुत्तरत । $\frac{1}{2} \times 4 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'शक्ति:' अस्य विशेषणं किम् ?

(ii) 'शरीरम्' अस्य क: पर्याय: ?

(iii) 'इदम्' इति सर्वनामपदं कस्य कृते प्रयुक्तम् ?

(iv) किं 'सम्बद्धम्' अव्ययपदम् अत्र प्रयुक्तम् ?

**(ख) गद्यांश:**

"तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि । एतेषां माहात्म्यम् - एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति । द्वितीयरत्नेन भोजनादिकम् अमृततुल्यम् उत्पद्यते । तृतीयरत्नात् चतुरङ्गबलं भवति । चतुर्थाद् रत्नादिदिव्याभरणानि जायन्ते । तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति ।"

**प्रश्ना:**

(अ) एकपदेनोत्तरत । $\frac{1}{2} \times 2 = 1$

एक पद में उत्तर दीजिए ।

Answer in one word.

(i) प्रथमेन रत्नेन किं स्मर्यते ?

(ii) अमृततुल्यं किमुत्पद्यते ?

(ब) पूर्णवाक्येनोत्तरत । $2 \times 1 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

(अहम्) राज्ञे किं दास्यामि ?

(स) यथानिर्देशमुत्तरत । $\frac{1}{2} \times 4 = 2$

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'ददाति' अस्य कर्तृपदं किम् ?

(ii) 'आदाय' अस्य क: पर्याय: अत्र प्रयुक्त: ?

(iii) 'एतेषां माहात्म्यम्' अत्र 'एतेषाम्' इतिपदं केभ्य: प्रयुक्तम् ?

(iv) 'विषम्' अस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**(ग) नाट्यांश:**

“कौसल्या — जात ! अस्ति ते माता ? स्मरसि वा तातम् ?

लव: — नहि ।

कौसल्या — तत: कस्य त्वम् ?

लव: — भगवत: सुगृहीतनामधेयस्य वाल्मीके: ।

कौसल्या — अयि जात ! कथयितव्यं कथय ।

लव: — एतावदेव जानामि । (प्रविश्य सम्भ्रान्ता:)

बटव: — कुमार ! कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभि: स्वयं प्रत्यक्षीकृत: ।”

**प्रश्ना:**

(अ) एकपदेनोत्तरत । **$\frac{1}{2} \times 2 = 1$**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) ‘वाल्मीके:’ अस्य किं विशेषणम् ?

(ii) अस्माभि: क: भूतविशेष: प्रत्यक्षीकृत: ?

(ब) पूर्णवाक्येन उत्तरत । **$2 \times 1 = 2$**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

भूतविशेषोऽश्व कुत्र अनुश्रूयते ?

(स) यथानिर्देशम् उत्तरत । **$\frac{1}{2} \times 4 = 2$**

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) ‘अनुश्रूयते’ अस्य कर्तृपदं किम् ?

(ii) ‘अस्माभि:’ इति सर्वनामपदं केभ्य: प्रयुक्तम् ?

(iii) ‘इदानीम्’ अस्य क: पर्याय: अत्र प्रयुक्त: ?

(iv) ‘परोक्षीकृत:’ अस्य विलोमपदं किम् ?

5. शब्दार्थान् मेलयित्वा लिखत । $\frac{1}{2} \times 4 = 2$

शब्दों का अर्थों से मिलान कर लिखिए :

Match the words with their meanings and rewrite the same :

| | **शब्दा:** | | **अर्था:** |
|---|---|---|---|
| (अ) | अभिधीयसे | (i) | पठितम् |
| (ब) | अधीतम् | (ii) | पीड़िता: |
| (स) | खलीकरोति | (iii) | कथ्यसे |
| (द) | विक्लवा: | (iv) | दुष्टीकरोति । |

6. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत : $1 \times 4 = 4$

रेखाङ्कित पदों के आधार पर प्रश्न निर्माण कीजिए :

Frame questions on the basis of underlined words.

(i) 'अन्धन्<u>तम</u>: प्रविशन्ति ।'

(ii) 'तद्<u>धावतो</u>ऽन्यानत्येति ।'

(iii) 'असूर्या नाम ते <u>लोका</u>:'

(iv) 'दिदेश <u>कौत्साय</u> समस्तमेव ।'

7. अधोलिखित**भावार्थयो**: रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कृत्वा लिखत : $\frac{1}{2} \times 12 = 6$

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति कर लिखिए :

Fill in the blanks in the following **two** explanations with the help of the words given in the box and rewrite the same :

(अ) "असुर्या नाम ते लोका अन्धेन तमसावृता:"

तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना: ।।"

**भावार्थ:**

संसारे स्वेच्छया मृत्यो: ________ (i) महत्पापं भवति । ये जना: ________ (ii) भवन्ति ते मृत्यो: ________ (iii) यान् लोकान् प्राप्नुवन्ति तत्र ________ (iv) अन्धकार: भवति ________ (v) कीदृशम् अपि ________ (vi) न भवति अत: आत्मवधो नैव कार्य: ।

(ब) "नालम्बते दैष्टिकतां न निषीदति पौरुषे ।

शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ।।"

**भावार्थ**:

यथा श्रेष्ठ: कवि: ________ (i) प्रकाशयितुं ________ (ii) तेषाम्, अर्थम् ________ (iii) एव प्रयुङ्क्ते येन कविता ________ (iv) स्यात् एवमेव राजा अपि न केवलं ________ (v) आश्रयते न वा केवलं ________ (vi) ।

**मञ्जूषा**

| |
|---|
| 1. पदानि, 2. प्रभावपूर्णा, 3. वरणम्, 4. अनन्तरम्, 5. तत्र, 6. सुखम्, 7. स्वकवित्वम्, 8. अभिज्ञाय, 9. एतादृशा:, 10. महान्, 11. भाग्यम्, 12. पुरुषार्थम् । |

8. अधोलिखितयो: **श्लोकयो**: अन्वयद्वये रिक्तस्थानपूर्तिं कुरुत : $\mathbf{1\frac{1}{2} + 1\frac{1}{2} = 3}$

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्त स्थानो की पूर्ति कीजिए :

Fill in the blanks in the following prose-order renderings of the **two** verses :

(अ) "तथेति तस्यावितथं प्रतीत:, प्रत्यग्रहीत्संगरमग्रजन्मा ।

गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ।।"

**अन्वय**:

तथा इति अवितथं ________ (i) अग्रजन्मा संगरम् प्रत्यग्रहीत् । रघु: अपि गाम् ________ (ii) अवेक्ष्य कुबेरात् ________ (iii) निष्क्रष्टुं चकमे ।

(ब) "गिरौ कलापी गगने पयोदो लक्षान्तरेऽर्कश्च जले च पद्मम् ।

इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्यो यस्य मित्रं न हितस्य दूरम् ।।"

**अन्वय**:

गिरौ कलापी गगने पयोद: लक्षान्तरे ________ (i) अर्क: जले च पद्मम् द्विलक्षे ________ (ii) कुमुदस्य बन्धु: य: यस्य मित्रम् हि तस्य ________ (iii) न ।

9. यथानिर्देशम् उत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत । $\frac{1}{2} \times 4 = 2$

कर्ता एवं क्रियापद चुनिए ।

Select the subject and the verb.

(i) 'नाशयति च पुरुषमत्यासङ्गो विषयेषु ।'

(ii) 'अहं देशसेवां कर्तुं गृहाद् बहिरभवम् ।'

(ब) विशेषणपदं चिनुत । $1 \times 2 = 2$

विशेषण पद चुनिए ।

Select the adjective.

(i) 'महाराज ! नववार्षिकी मे कन्या ।'

(ii) 'सप्त ग्रहाः स्वर्गं परितो भ्रमन्ति ।'

(स) अधोलिखितपङ्क्तिद्**द्वये** रेखाङ्कित-सर्वनामपदे काभ्यां प्रयुक्ते ? $1 \times 2 = 2$

निम्नलिखित **दो** पंक्तियों में रेखांकित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?

In the following **two** lines for whom are the underlined pronouns used ?

(i) 'यद्रत्नं रत्नाभरणादिकं सूते <u>तद्</u> ग्राह्यम् ।'

(ii) '<u>अहं</u> मोदकस्यैकं ग्रासमगृह्णम् ।'

(द) अधोलिखितपंक्ति**द्वये** 'कठोरा' तथा 'मिलितुम्' इति पदयोः समानार्थकपदे चित्वा लिखत : $1 \times 2 = 2$

निम्नलिखित **दो** पंङ्क्तियों में 'कठोर' तथा 'मिलने के लिए' इन पदों के समानार्थक पद चुनकर लिखिए :

Select and write the synonyms of the words 'Harsh' and 'to join' from the **two** lines given below :

(i) भोजनगोष्ठ्यां समवेतुं प्राबल्यस्य प्रवाह आसीत् ।

(ii) करवालधारा प्रसिद्धा लोकेषु ।

(य) कः कं कथयति ? $\frac{1}{2} \times 4 = 2$

कौन किसको कह रहा है ?

Who is saying this to whom ?

(i) 'भगवान् त्वां दीर्घजीविनं कारयतु ।'

(ii) 'भो राजन् ! त्वय्येवंविधं सहजमौदार्यं विद्यते ।'

10. (अ) अधोलिखितलेखकानाम् **एकस्य** काव्यं लिखत : $1 \times 5 = 5$

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए :

Write the names of any **one** work of each of the following poets :

कालिदासः, भारविः, दण्डी, भवभूतिः, व्यासः ।

(ब) अधोलिखितरचनानाम् लेखकानां नामानि लिखत : $1 \times 5 = 5$

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :

Write the names of the authors of the following works :

1. समुद्रसङ्गमः 2. प्रबन्धपारिजातः 3. नीतिशतकम् 4. शिशुपालवधम् 5. पञ्चतन्त्रम् ।

## खण्डः घ (Section D) 10 + 10 = 20 अङ्काः

### छन्दोऽलङ्काराः

### छन्द एवं अलङ्कार

### Metres and Figures of Speech

11. (अ) प्रश्नान् उत्तरत । $1 \times 2 = 2$

प्रश्नों के उत्तर दीजिए ।

Answer the questions.

(i) 'सूर्यस्य' अत्र अवर्णः दीर्घो लघुः वा ।

(ii) नगणस्य स्वरूपं लिखत ।

(ब) अधोलिखितपरिभाषाः पूरयत : $1 \times 4 = 4$

निम्नलिखित परिभाषाओं को पूर्ण कीजिए :

Complete the following definitions :

(i) उक्ता ________ तभजाजगौ गः ।

(ii) रसै रुद्रैश्छिन्ना ________ शिखरिणी ।

(iii) _______ वंशस्थमुदीरितं जरौ ।

(iv) ननम ________ मालिनी ________ ।

(स) **एकस्य** छन्दस उदाहरणं लिखत । $2 \times 1 = 2$

**एक** छन्द का उदाहरण लिखिए ।

Give the example of the **one** metre.

अनुष्टुप्, मन्दाक्रान्ता ।

(द) अधोलिखितश्लोकस्य चरणे किं छन्दः ? $2 \times 1 = 2$

निम्नलिखित श्लोक के चरण में कौन सा छन्द है ?

What is the Metre in the following line ?

'तवार्हतो नाभिगमेन तृप्तम् ।'

**अथवा/OR**

'सत्सङ्गतिः कथय किं न करोति पुंसाम् ।'

12. (अ) कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत । **3**

किसी **एक** शब्दालङ्कार का सोदाहरण लक्षण लिखिए ।

Define and give example of any **one** of the following :

यमकम्, श्लेषः ।

(ब) कस्यचि**देकस्य** अर्थालङ्कारस्य सोदाहरणं लक्षणं लिखत । $1 \times 3 = 3$

किसी **एक** अर्थालङ्कार का लक्षण एवं उदाहरण लिखिए :

Define and give example of any **one** of the following :

रूपकम्, अर्थान्तरन्यासः ।

13. (अ) अधः प्रदत्तासु पंक्तिषु अलङ्कारं निर्दिशत : $1 \times 2 = 2$

निम्नलिखित पंक्तियों में अलङ्कार का निर्देश कीजिए :

What are the figures of speech in the following lines ?

(i) स्थितः पृथिव्या इव मानदण्डः ।

(ii) रमते न मरालस्य मानसं मानसं विना ।

(ब) अधोलिखितपरिभाषा**द्वयं** पूरयत : $1 \times 2 = 2$

निम्नलिखित **दोनों** परिभाषाओं को पूर्ण कीजिए :

Complete the following definitions :

(i) अनुप्रासः ...... वैषम्येऽपि...... यत् ।

(ii) श्लिष्टैः पदैर....... श्लेष...... ।